Roll No. (अनुक्रमांक–संख्या) ..... **Code: 822-23 SKT - M**

वार्षिकी परीक्षा, फरवरी–मार्चः 2022 – 2023

कक्षा - अष्टमी

संस्कृतम्

कृपया जाँच कर लें कि इस प्रश्न–पत्र में कुल 20 प्रश्न और कुल 12 पृष्ठ हैं।

निर्धारित–अवधिः : होरात्रयम् पूर्णाङ्काः – 80

निर्देशाः

1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
2. प्रश्नपत्रे विंशतिः प्रश्नाः सन्ति, सर्वेऽपि अनिवार्याः सन्ति।
3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण लेखनीयानि।
4. प्रश्नसङ्ख्या प्रश्नपत्रानुसारं लेखनीया।
5. प्रश्नपत्रे उत्तराणि न लेखनीयानि।
6. खण्डसङ्ख्या अपि लेखनीया।

खण्डः – 'क'
(अपठित–अवबोधनम्) 10 अङ्काः

1 अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत– (10)

मानवजीवनस्य महान् शत्रुः अस्ति क्रोधः। सः क्रोधः मानवस्य शरीरे एव वसति। यः जनः क्रोधं करोति सः सदैव अनुचितकार्याणि करोति। क्रोधस्य कारणात् एव परिवारे समाजे च अनेके कलहाः भवन्ति। क्रोधी जनः कदापि स्वपरिवारे समाजे वा प्रतिष्ठां न प्राप्नोति। सः कदापि सुखम् अपि न अनुभवति। सः सदैव अन्यान् पीडयति। तेन सह कोऽपि मित्रतां कर्तुं न इच्छति। क्रोधेन शरीरे अनेके रोगाः भवन्ति। एतेन मानवस्य चिन्तनशक्तिः नष्टा भवति। क्रोधी एतत् अपि चिन्तयितुं न शक्नोति यत् किम् उचितं किं च अनुचितम्? सः

सत्यासत्यस्य निर्णयं कर्तुम् अपि समर्थः न भवति। सः जीवने कदापि सफलतां न लभते। क्रोधेन कोऽपि लाभः न भवति, हानिः एव भवति। अतः क्रोधः न करणीयः। कथ्यते अपि "क्रोधेन कार्यं न सिध्यति।"

(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) (1x2=2)

(i) क्रोधेन मानवस्य का नष्टा भवति?

(ii) क्रोधी जनः जीवने किं न लभते?

(iii) क्रोधः कस्य महान् शत्रुः?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) (2x2=4)

(i) क्रोधी मानवः किं कर्तुम् असमर्थः भवति?

(ii) क्रोधी जनः कुत्र प्रतिष्ठां न प्राप्नोति?

(iii) क्रोधः कुत्र वसति?

(इ) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत– (1)

(ई) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नत्रयम्) (1x3=3)

(i) 'क्रोधेन शरीरे अनेके रोगाः भवन्ति' अस्मिन् वाक्ये क्रियापदं किम्?
(क) शरीरे (ख) भवन्ति (ग) रोगाः

(ii) 'दुःखम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?
(क) सुखम् (ख) प्रतिष्ठाम् (ग) क्रोधम्

(iii) 'यः जनः क्रोधं करोति सः सदैव अनुचितकार्याणि करोति' अत्र 'यः' इति पदस्य विशेष्यपदं किम्?
(क) सदैव (ख) करोति (ग) जनः

(iv) 'रिपुः' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?
(क) शत्रुः (ख) शरीरे (ग) कदापि

खण्डः–'ख'

(रचनात्मक–कार्यम्) 15 अङ्काः

2. भवान् गोपालः। भवतः विद्यालये स्वच्छतादिवस–कार्यक्रमस्य आयोजनम् अभवत्। अस्य वर्णनं कुर्वन् मित्रं सुरेशं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा **सम्पूर्णं पत्रम् उत्तरपुस्तिकायां लिखत–** (½x10=5)

314–आर. के. पुरम्,

नवदिल्लीतः

तिथिः .....

प्रिय मित्र सुरेश।

(i) ..... ।

अत्र (ii) ..... तत्रास्तु। गतसप्ताहे अस्माकं (iii) ..... स्वच्छतादिवस–कार्यक्रमः आयोजितः। अस्मिन् (iv) ..... छात्रेषु अध्यापकेषु च अपूर्वः उत्साहः आसीत्। अस्य समारोहस्य मुख्यातिथिः (v) ..... आसीत्। पूर्वं तु सर्वे मिलित्वा विद्यालयस्य प्राङ्गणं (vi) ..... अकुर्वन्। तदनन्तरं मन्त्रिमहोदयः स्वच्छतायाः (vii) ..... वर्णितवान्। विद्यालयस्य प्रधानाचार्यः अपि (viii) ..... समबोधयत्। छात्रैः अनेके कार्यक्रमाः प्रदर्शिताः। भवतः विद्यालये किं किम् अभवत् इति कृपया पत्रेण (ix) ..... ।


भवतः मित्रम्

(x) .....

मञ्जूषा

अवसरे, महत्त्वम्, छात्रान्, कुशलम्, पर्यावरणमन्त्री, नमोनमः, सूचयतु, विद्यालये, गोपालः, स्वच्छम्।

3 अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत– (1x5=5)



मञ्जूषा

छात्राः, विशालः, वातावरणम्, विद्यालयः, उद्यानम्, पठन्ति, सुन्दरम्, पुष्पाणि, वृक्षाः, भवनम्, क्रीडाक्षेत्रम्, स्वच्छम्, मिलित्वा

अथवा

"अनुशासनम्" इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत–

मञ्जूषा

जीवने, छात्राः, प्राप्नुवन्ति, आवश्यकम्, कुर्याम, पालनम्, सफलाः, आचरणम्, महान्, नियमानाम्, जनाः, लक्ष्यम्, सत्यस्य

4 अधोलिखितानि वाक्यानि संस्कृतभाषया अनुवादं कृत्वा लिखत– (केवलं पञ्चवाक्यानि) (1x5=5)

(क) छात्र पाठ पढ़ रहे हैं।	The students are reading the lesson.
(ख) वे सब विद्यालय गए।	They all went to school.
(ग) तुम वहाँ जाओ।	There you go.

(घ) रमा को लेख लिखना चाहिए। Rama should write the article.

(ङ) लड़की वहाँ खेल रही है। The girl is playing there.

(च) मेरे पिताजी शिक्षक हैं। My father is a teacher.

(छ) वह फल खाएगा। He will eat the fruit.

खण्डः–'ग'

(अनुप्रयुक्त–व्याकरणम्) 25 अङ्काः

5 अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कृत्वा पूर्णवाक्यं लिखत– (1x3=3)
(केवलं प्रश्नत्रयम्)

(i) महर्षिः दयानन्दः सत्य+अर्थप्रकाशम् अरचयत्।

(ii) अस्माभिः संस्कृतविषये एका प्रश्नोत्तरी आयोजिता।

(iii) मम गृहे सर्वेषां सु+आगतम् अस्ति।

(iv) सः यथा कथयति तथैव कुरु।

6 प्रदत्तविकल्पेभ्यः समुचितं शब्दरूपं चित्वा लिखत– (केवलं प्रश्नचतुष्टयम्) (1x4=4)

(i) अहं ..... नमामि।
(क) देवस्य (ख) देवम् (ग) देवात्

(ii) ..... पिता दशरथः आसीत्।
(क) रामः (ख) रामात् (ग) रामस्य

(iii) मम नगरे अनेके ..... निवसन्ति।
(क) मुनयः (ख) मुनिना (ग) मुनेः

(iv) अहं ..... विद्यालये पठामि।
(क) तेन (ख) तस्य (ग) तस्मिन्

(v) ..... कुत्र गच्छसि?
(क) त्वया (ख) त्वम् (ग) तव

7 प्रदत्तेषु वाक्येषु अङ्कानां स्थाने उपयुक्तं सङ्ख्यावाचकं संस्कृतपदं विकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नत्रयम्) (1x3=3)

(i) तत्र ..... कन्याः क्रीडन्ति। (3)
(क) त्रयः (ख) त्रीणि (ग) तिस्रः

(ii) उद्याने ..... जनाः भ्रमन्ति। (4)
(क) चतस्रः (ख) चत्वारः (ग) चत्वारि

(iii) सभायां ..... जनाः सन्ति। (85)
(क) पञ्चाशत् (ख) पञ्चाशीतिः (ग) अष्टपञ्चाशत्

(iv) वने ..... पशवः सन्ति। (24)
(क) चतुर्विंशतिः (ख) चतुर्दश (ग) चतुश्चत्वारिंशत्

8 रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत– (केवलं प्रश्नचतुष्टयम्) (1x4=4)

(i) सूर्याय नमः।

(ii) जनाः नदीम् उभयतः भ्रमन्ति।

(iii) माता पुत्रे स्निह्यति।

(iv) मम गृहस्य पुरतः मन्दिरम् अस्ति।

(v) अलं कोलाहलेन।

9 प्रदत्तविकल्पेभ्यः समुचितं धातुरूपं चित्वा लिखत– (केवलं प्रश्नचतुष्टयम्) (1x4=4)

(i) वयं श्वः जन्तुशालां .....।
(क) गमिष्यति (ख) गमिष्यामः (ग) गमिष्यसि

(ii) छात्राः चित्राणि .....।
(क) अपश्यन् (ख) अपश्यत् (ग) अपश्यः

(iii) त्वं प्रतिदिनं संस्कृतं .....।
(क) पठेत् (ख) पठेम (ग) पठेः

(iv) पुत्रः जनकं ..... ।

(क) सेवसे (ख) सेवते (ग) सेवन्ते

(v) त्वं सत्यं ..... ।

(क) वद (ख) वदन्तु (ग) वदानि

10 प्रदत्तेषु वाक्येषु रेखाङ्कितपदेषु प्रकृति–प्रत्ययौ संयोज्य विभज्य वा **पूर्णं वाक्यं** लिखत– (1x3=3)
(केवलं प्रश्नत्रयम्)

(i) वयं क्रीडित्वा आगच्छामः।

(ii) धर्मं परि+त्यज्+ल्यप् कोऽपि सुखी न भवति।

(iii) शृगालः मूषकान् खादितुम् इच्छति स्म।

(iv) अहं भ्रम्+क्त्वा आगच्छामि।

11 मञ्जूषातः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत **पूर्णं च वाक्यं** लिखत– (1x2=2)
(केवलं प्रश्नद्वयम्)

(i) ..... सोमवासरः अस्ति।

(ii) वयम् ..... विद्यालयं गच्छामः?

(iii) ..... वर्षा भवति तदा मयूरः नृत्यति।

मञ्जूषा

यदा, कदा, अद्य

12 अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु उपसर्गं संयोज्य पृथक् कृत्वा वा लिखत– (1x2=2)
(केवलं प्रश्नद्वयम्)

(i) सः प्रसन्नताम् अनु+भवति।

(ii) शृगालः मूषकराजं प्रहरति।

(iii) गुरुः आश्रमे वि+हरति।

खण्डः–'घ'
(पठित–अवबोधनम्) 30 अङ्काः

13 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत– 5

सः असहिष्णुः यात्री पुनः दुर्वचनानि अकथयत्। शिष्यः महर्षिम् उपगत्य सर्वं वर्णितवान्। महर्षिः एकं सन्देशं दत्वा पुनः शिष्यं तत्र प्रेषितवान्। शिष्यः तत्र गत्वा अकथयत्–

"अस्माकं स्वामी कथयति यत् अमृतवर्षया भवतः बहुशक्तिः नष्टा। पुनः अमृतवर्षायै शक्तिं प्राप्तुम् एतानि मधुराणि रसयुक्तानि फलानि स्वीकरोतु। 'एतत् श्रुत्वा सः यात्री लज्जितः भूत्वा धावित्वा च महर्षेः समीपम् आगत्य पादयोः पतित्वा अकथयत्"– "क्षमस्व महर्षे! क्षमस्व। अहम् अपराधी अस्मि। भवान् देवः। क्षमस्व। क्षमस्व।" इदं सर्वं दृष्ट्वा शिष्याः चकिताः आसन्।

(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) (½x2=1)

(i) के चकिताः अभवन्?

(ii) कः लज्जितः अभवत्?

(iii) शिष्यः कम् उपगत्य गत्वा सर्वं वर्णितवान्?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) (1x2=2)

(i) महर्षेः सन्देशः कः आसीत्?

(ii) यात्री महर्षेः पादयोः पतित्वा किम् अवदत्?

(iii) असहिष्णुः कः आसीत्?

(इ) निर्देशानुसारम् उत्तरत– (केवलं प्रश्नद्वयम्) (1x2=2)

(i) 'लज्जितः' अस्य विशेषणपदस्य विशेष्यपदं गद्यांशे किम् अस्ति?
(क) स्वामी (ख) यात्री (ग) आसन्

(ii) 'आगत्य' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?
(क) गत्वा (ख) भूत्वा (ग) धावित्वा

(iii) 'शिष्यः तत्र गत्वा अकथयत्' अस्मिन् वाक्ये कर्तृपदं किम्?
(क) तत्र (ख) अकथयत् (ग) शिष्यः

14 अधोलिखितं श्लोकद्वयं पठित्वा प्रश्नानाम् उत्तराणि लिखत– (5)

अधमा धनम् इच्छन्ति धनं मानं च मध्यमाः।
उत्तमा मानम् इच्छन्ति मानो हि महतां धनम्।।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग् भवेत्।।

(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) (½x2=1)

(i) के मानम् इच्छन्ति?

(ii) सर्वे कीदृशाः सन्तु?

(iii) अधमाः किम् इच्छन्ति?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) (1x2=2)

(i) सर्वे कानि पश्यन्तु?

(ii) महतां धनं किं भवति?

(iii) मध्यमाः किम् इच्छन्ति?

(इ) निर्देशानुसारम् उत्तरत– (केवलं प्रश्नद्वयम्) (1x2=2)

(i) 'रोगरहिताः' इति पदस्य किं पर्यायपदं श्लोके प्रयुक्तम्?
(क) सर्वे (ख) मा (ग) निरामयाः

(ii) 'सर्वे भवन्तु सुखिनः' अस्मिन् वाक्ये क्रियापदं किम्?
(क) भवन्तु (ख) सुखिनः (ग) सर्वे

(iii) 'उत्तमाः' इति पदस्य किं विलोमपदं श्लोके प्रयुक्तम्?
(क) धनम् (ख) अधमाः (ग) महताम्

15 अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत– (5)

अन्यः छात्रः – किम् एते महोदयाः अस्माकं राष्ट्रस्य 'वैज्ञानिक–परामर्शदातारः' अपि अभवन्?

आचार्यः – आम्। अष्टनवति–अधिक–एकोनविंशतिशततमे वर्षे (1998) एतेषां महोदयानां नियुक्तिः अस्मिन् पदे अभवत्।

अन्या छात्रा – अस्माकं राष्ट्रस्य सर्वोच्चं नागरिकं सम्मानम् 'भारतरत्नम्' अपि एते महोदयाः प्राप्तवन्तः।

आचार्यः – आम्, सप्तनवति–अधिक–एकोनविंशतिशततमे वर्षे (1997) महोदयः इदं सम्मानं प्राप्तवान्। अयं महानुभावः स्वगुणानुरूपम् अस्माकं राष्ट्रस्य राष्ट्रपतेः पदम् अलङ्कृतवान्। अतीव प्रेरणादायकम् आसीत् अस्य महोदयस्य जीवनम्।

सर्वे – आम् मान्यवर! डॉ. कलाम–महोदयस्य जीवनस्य सन्देशः अस्ति – 'जीवने कदापि आत्मानं लघुम् असहायं च मा चिन्तयतु। सङ्कल्पे दृढ़विश्वासे आशायां च साफल्यं निहितम् अस्ति।

आचार्यः – सत्यम्। धन्योऽयं भारतरत्नम्, अन्तरिक्ष–वैज्ञानिकः, कविः दार्शनिकः च डॉ. ए.पी.जे अब्दुलकलाम–महोदयः।

सर्वे – (मिलित्वा) एतदर्थम् एव उक्तम् – गुणाः पूजास्थानं गुणिषु।

(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) (½x2=1)

(i) कस्य जीवनं प्रेरणादायकम् आसीत्?
(ii) सङ्कल्पे दृढ़विश्वासे आशायां च किं निहितम् अस्ति?
(iii) अस्माकं राष्ट्रस्य सर्वोच्चं नागरिकं सम्मानं किम् अस्ति?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) (1x2=2)

(i) डॉ. कलाम–महोदयः किं पदम् अलङ्कृतवान्?
(ii) जीवने कदापि किं न चिन्तयेत्?
(iii) डॉ. कलाम–महोदयः 'वैज्ञानिक–परामर्शदाता' इति पदे कदा नियुक्तः अभवत्?

(इ) निर्देशानुसारम् उत्तरत– (केवलं प्रश्नद्वयम्) (1x2=2)

(i) 'डॉ. कलाम–महोदयस्य जीवनस्य सन्देशः अस्ति' अत्र क्रियापदं किम् अस्ति?
(क) अस्ति (ख) जीवनस्य (ग) सन्देशः
(ii) 'महोदयानाम्' अस्य विशेष्यपदस्य किं विशेषणपदं संवादे अस्ति?
(क) नियुक्तिः (ख) अभवत् (ग) एतेषाम्
(iii) 'मरणम्' इति पदस्य किं विलोमपदं संवादे प्रयुक्तम्?
(क) नागरिकम् (ख) जीवनम् (ग) असहायम्

16 अधोलिखितं श्लोकं पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा पूर्णम् अन्वयं लिखत– (½x4=2)

क्षुधासमं नास्ति शरीरपीडनम् चिन्तासमं नास्ति शरीरशोषणम्।
विद्यासमं नास्ति शरीरभूषणं क्षमासमं नास्ति शरीररक्षणम्।।

अन्वयः– क्षुधासमं (i) ..... न अस्ति, चिन्तासमं शरीरशोषणम् न (ii) .....
विद्यासमं (iii) ..... न अस्ति, (iv) ..... शरीररक्षणं न अस्ति।

मञ्जूषा

शरीरभूषणम्, शरीरपीडनम्, क्षमासमम्, अस्ति

17 अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा **पूर्णं वाक्यं** लिखत (1x4=4)
(केवलं प्रश्नचतुष्टयम्)

(क) कालिदासेन **त्रीणि** नाटकानि रचितानि।

(ख) **नागरिकः** रात्रिभोजाय महात्मानं प्रार्थयत्।

(ग) मूषकाः **बिलात्** बहिः आगच्छन्ति।

(घ) सः पुरुषः महात्मानं **गृहम्** आगन्तुम् अकथयत्।

(ङ) रामायणं **लौकिकसंस्कृतस्य** आदिमः ग्रन्थः अस्ति।

18 अधोलिखितानि वाक्यानि कथाक्रमानुसारं संयोज्य **पूर्णानि वाक्यानि** लिखत, केवलं (½x6=3)
क्रमसङ्ख्या न लेखनीया–

(क) ग्रीष्मकाले चटकायाः गृहं नष्टम् अभवत्।

(ख) चटका काकाय स्वगृहे शरणम् अयच्छत्।

(ग) चटका तृणैः गृहम् अरचयत्।

(घ) अभिमानी काकः चटकायै स्वगृहे शरणं न अयच्छत्।

(ङ) काकः चटका च परस्परं मित्रे आस्ताम्।

(च) एकदा वर्षाकाले काकस्य गृहं नष्टम् अभवत्।

19 मञ्जूषातः समुचितपदानि चित्वा अधोलिखित–सूक्तेः भावार्थं पूरयित्वा लिखत– (½x4=2)

सूक्तिः– आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

भावार्थः– अस्माकं शत्रुः अस्माकं (i) ..... एव (ii) .....। एषः कः? आलस्यम्।
आलस्यम् एव वस्तुतः अस्माकं (iii) ..... अस्ति। अतः (iv) ..... मा कुरुत।

मञ्जूषा

शत्रुः, शरीरे, आलस्यम्, अस्ति

20 अधोलिखितानां पदानां समुचितार्थकं पदं मञ्जूषातः चित्वा समक्षं लिखत– (1x4=4)

(i) लोचनम्

(ii) प्रणम्य

(iii) विद्या

(iv) पृथ्वी

मञ्जूषा

ज्ञानम्, नेत्रम्, धरा, नत्वा